श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७८

*रुक्मिणीस्वयंवरं*

त्रिदशवर्धकिवर्धितकौशलं त्रिदशदत्तसमस्तविभूतिमत्।
जलधिमध्यगतं त्वमभूषयो नवपुरं वपुरञ्चितरोचिषा॥ १ ॥

ददुषि रेवतभूभृति रेवतीं हलभृते तनयां विधिशासनात्।
महितमुत्सवघोषमपूपुषः समुदितैर्मुदितैः सह यादवैः॥ २ ॥

अथ विदर्भसुतां खलु रुक्मिणीं प्रणयिनीं त्वयि देव सहोदरः।
स्वयमदित्सत चेदिमहीभुजे स्वतमसा तमसाधुमुपाश्रयन्॥ ३ ॥

चिरधृतप्रणया त्वयि बालिका सपदि काङ्क्षितभङ्गसमाकुला।
तव निवेदयितुं द्विजमादिशत् स्वकदनं कदनङ्गविनिर्मितम्॥ ४ ॥

द्विजसुतोऽपि च तूर्णमुपाययौ तव पुरं हि दुराशदुरासदम्।
मुदमवाप च सादरपूजितः स भवता भवतापहृता स्वयम्॥ ५ ॥

स च भवन्तमवोचत कुण्डिने नृपसुता खलु राजति रुक्मिणी।
त्वयि समुत्सुकया निजधीरतारहितया हि तया प्रहितोऽस्म्यहम्॥ ६ ॥

तव हृताऽस्मि पुरैव गुणैरहं हरति मां किल चेदिनृपोऽधुना।
अयि कृपालय पालय मामिति प्रजगदे जगदेकपते तया॥ ७ ॥

अशरणां यदि मां त्वमुपेक्षसे सपदि जीवितमेव जहाम्यहम्।
इति गिरा सुतनोरतनोद्भृशं सुहृदयं हृदयं तव कातरम्॥ ८ ॥

अकथयस्त्वमथैनमये सखे तदधिका मम मन्मथवेदना।
नृपसमक्षमुपेत्य हराम्यहं तदयि तां दयितामसितेक्षणाम्॥ ९ ॥

प्रमुदितेन च तेन समं तदा रथगतो लघु कुण्डिनमेयिवान्।
गुरुमरुत्पुरनायक मे भवान् वितनुतां तनुतामखिलापदाम्॥ १० ॥

**********